॥ ओ३म् ॥

बन्धाय विषयाऽऽसक्तं
मुक्त्यै निर्विषयं मनः।
मन एवं मनुष्याणां
कारणं बन्धमोक्षयोः॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

कर्मायत्तं फलं पुंसां
बुद्धिः कर्मानुसारिणी।
तथापि सुधियश्चाऽऽर्याः
सुविचार्यैव कुर्वते॥

( चाणक्य-नीति )

卐 वर्षम्-८ 卐 अंकः-१० ( १७८ ) 卐 १६ नवम्बरः २०१८ तः ३० नवम्बरमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## गुरुकुलशिक्षायाः ज्ञानगंगा समग्रविश्वे प्रवाहितव्य-योगीआदित्यनाथः

गुरूकुलस्य गोशालाभवनस्योद्घाटनं व वार्षिक स्मारिकायाः विमोचनं कृतवान, योगी आचार्य देवव्रत व गुरूकुलस्य प्रकल्पानां मुक्त कंठेन् प्रशंसा कृतवान।

भारतीयसंस्कृतेः संरक्षक योगी आदित्यनाथः उक्तवान यत् सुसंस्कारित गुरूकुल शिक्षायाः ज्ञानगंगायाः प्रवाहः सम्पूर्ण विश्वे भवितव्यम्। एषा पद्धति अनुशासनं प्रेमस्य भावना आनयति। एषा पद्धति विश्वे महान शक्ति रूपे स्थापिष्यति येन समाजं नूतन दिशा व मार्गदर्शनं मिलिष्यति।



ते गुरूकुलस्य द्वि दिवसीय 106 वार्षिक समारोहे मुख्यातिथि आसीत्। अध्यक्षता हिमाचल प्रदेशस्य राज्यपालः गुरूकुलस्य संरक्षक आचार्य देवव्रत कृतवान। योगी स्व उद्बोधने उक्तवान यत् सकारात्मक चिन्तनं सर्वेषां कृते आवश्यकोऽति। तदनन्तरमेव समाजस्य उन्नति भविष्यति उक्तवन्तः यत् गो मातायाः संरक्षणं भवितव्यम्।

शेषभागःद्वितीयेपुटे

## श्रीशंकराचार्यसंस्कृतमहाविद्यालयः-भारतीयविद्याभवनम् संस्कृत-कौस्तुभ-पुरस्कारसमारोहः-2017

नवदेहली। महतो हर्षस्य विषयोऽयं यदस्य अक्तूबरमासस्य चतुर्विंशतितारिकायां बुधवासरे भारतीयविद्याभवनस्य मुख्यसभागारे श्रीशंकराचार्य-संस्कृत-महाविद्यालयस्य तत्त्वावधाने संस्कृत – कौस्तुभपुरस्कारसमारोहः 2017 समायोजितः। अस्मिन्वर्षे पुरस्कारप्रदानार्थं निर्णायकमण्डलेन "श्री गुरुमहाराजचरितम्" महाकाव्यप्रणेतारः प्रो. हरिनारायणदीक्षितमहोदयाः चिताः।

शरत्पूर्णिमायां समायोजितेऽस्मिन्समारोहे मुख्यातिथिरूपेण आचार्यलोकेशचन्द्रमहोदयाः, सारस्वतातिथित्वेन आचार्यसत्यव्रतशास्त्रिवर्याः, विशिष्टातिथिरूपेण श्री लालबहादुरशास्त्री – राष्ट्रिय – संस्कृत – विद्यापीठस्य कुलपतयः आचार्यरमेशकुमारपाण्डेयः महोदयाः, भारतीयविद्याभवनस्य



देहलीकेन्द्रनिदेशकाः श्री अशोकप्रधानमहोदयाः च समुपस्थिताः आसन्।

सम्मेलनस्यास्य शुभारम्भः मन्त्रोच्चारणेन सह दीपप्रज्ज्वालनेन अभवत् । तदनन्तरं मेहताविद्यालयस्य संस्कृतच्छात्राः मधुरध्वनिना वैदिकमङ्गलाचरणम् कृत्वा सरस्वतीवन्दनाम् अप्यगायन् यस्यां वाद्ययन्त्रैः सह संगतिः मेहताविद्यालयस्येव सङ्गीतशिक्षिका नीलासरकारमहोदया तबलावादकः यशपालमहाभागश्च कृतवन्तौ । तदनु च शंकराचार्य – संस्कृत – महाविद्यालयस्य प्राचार्यमहोदयाः श्रीमन्तः छविकृष्ण – आर्यमहाभागाः सभायै सर्वेषामभ्यागतानां परिचयं कारितवन्तः। निदेशकमहोदयाः श्री अशोकप्रधानमहाभागाश्च सर्वेषामभ्यागतानां स्वागतं पादपपुस्तकप्रदानेन च कृतवन्तः।

शेषभागःद्वितीयेपुटे

## रामन्दिरनिर्माणाय संतः सर्वकाराय धर्मादेशं दत्तवन्तः

नवदेहली। अयोध्यायां राममन्दिर निर्माणाय देहली प्रदेशस्य तालकटोरा सभांगणे सन्तः सर्वकार एवं देशस्य जनतया धर्मादेशः दत्तवान। अखिलभारतीय सन्तसमितेः संयोजने सन्तः मन्दिर निर्माणाय केन्द्रसर्वकारेण कानून निर्माणाय अथवा अध्यादेश आनेतुं उक्तवान। अखिलभारतीय




संतसमिते अध्यक्ष जगद्गुरू रामानन्दाचार्य, स्वामी हंसदेवाचार्यः धर्मादेशः दत्तवान। ते उक्तवन्तः यत् द्वि दिवस पर्यन्तं विचार-विमर्शानन्तरं साधुसंत सर्वकारं धर्मादेशः ददति। ते उक्तवन्तः यत् मन्दिर निर्माण आन्दोलनं दिग्भ्रमित केचन जनाः एवं राजनेतृन् सावधानाय उक्तवन्तः एवं एतादृशं कार्यं मा कुरू येन हिन्दु एकतायां विभेदः भविष्यान्ति। अयोध्यायां राममन्दिर निर्माण हेतु जनाः दीपावल्यां एकः दीपः अवश्येमव प्रज्वाल्यतु।

स्वामी हंसदेवार्य उक्तवन्तः यत् अगामि 9 नवम्बरं देहल्यां एवं 25 नवम्बरं अयोध्यायां विशाल धर्मसभायाः अयोजनं भविष्यति। अस्मिन्नवसरे आध्यात्मिक गुरू श्री श्री रविशंकरः उक्तवान यत् मन्दिर संतस्य आवश्यकता न भवति। यत्र सन्तः भवति तत्रैव मन्दिर भवति। सामान्य जनाः इच्छन्ति यत् राममन्दिरस्य निर्माणः भवितव्यम्। एतदर्थं वयं प्रयत्न एवं प्रार्थना उभय मार्गस्य अनुसरणं करिष्यायः।

## दत्तोपंतठेंगड़ी इति अस्य विश्वव्यापिदृष्टिः-भागवतः

नवदहेली। राष्ट्रीस स्वयं सेवक संघस्य सर संघचालक मोहन भागवत भारतीय मजदुर संघ, स्वदेशी जागरण मंच व भारतीय किसान संघस्य संस्थापक दत्तोपंत ठेंगड़ी महोदयस्य दृष्टीं विश्वव्यापी उक्तवान। सः तेषां जन्मदिवस डॉ. अम्बेडकर अन्ताराष्ट्रिय केन्द्रे आयोजित स्मृति व्याख्यानमालां सम्बोधयति स्म।



ते उक्तवन्तः यत् ढेंगड़ी कस्यापि विशिष्ट जनः भूमि व समय विशेषाय नासीत्। एतदर्थं सनातन धर्माधारित तेषां दृष्टिं अद्य सर्वे अंगीकरोति। ते कस्यापि विचारधारायाः विरोधि नासीत् परञ्च तेषां पूरक आसीत् ते मार्क्सवादी आसीत् तेषां मते ये सम्यक् आसीत तत्सर्वं सर्वस्य समक्षे उपस्थापितवान। एवमेव तेषां प्रतिपादने खलील जिब्रानस्य कविता पैगम्बरस्य प्रसंगः बुद्धस्य कथा व चारू मजुमदार आगच्छति। समान कार्य समान मूल्य" अस्य अनुसरणं चीन देशे अपि अभवत् वे स्वार्थ तथा तत्कालीन हित रहितासीत्। ते उक्तवन्तः यत् तेषां दृष्टि समावेशी आसीत् यत्र मजदूर, कृषक छात्र व कला कस्यापि विरोध नासीत् एवञ्य तँ पूर्ण रूपं दत्तवन्तः। तस्येव परिणामोऽस्ति यत् इदानी सर्वे परिश्रमी एकोऽस्ति। तेषां आधारः ते एव दत्तवन्तः। ते सर्वेष सहयोगस्य अनुयायी आसीत्। कस्यापि क्षेत्रस्य साधुवाक्यस्य अनुसरणं करोति स्म।

ते अतिवादी न अपितु मध्यमार्गी आसीत्। तत्र सर्वे सन्ति ते पूर्णमेव उक्तवन्तः 2000 तमे वर्षे मजदूरस्य रक्त झंडा भगवा भविष्यति स एव अभवत्। भागवत उक्तवान यत् सम्पूर्ण विश्वा इदानीं तेषां मार्गस्य अनुसरणं करोति। ते तदैव भविष्यति यदा सर्वे स्वाबलम्बी भविष्यति।

**प्रथमपुटस्य शेषभागः** 
## श्रीशंकराचार्यसंस्कृतमहाविद्यालयः....

सर्वेषां स्वागतानन्तरं निदेशकमहोदयैः श्री अशोकप्रधानवर्यैः स्ववक्तव्ये शंकराचार्य - महाविद्यालयस्य उत्तरोत्तरप्रगत्यै अधिष्ठात्रीमहाभागाः आचार्या शशिप्रभाकुमारमहाभागाः प्राचार्यमहोदयाश्च प्रशंसिताः। कौस्तुभपुरस्कारपरिचयः तत्कृते निर्णयप्रविधिरपि सभायै बोधितः। पुरस्कारधनराशि पञ्चाशत्सहस्रेभ्यः द्विगुणं संवर्ध्य एकलक्षात्मकं करणाय भवनस्य मुख्यालयं प्रति आभार प्रकटितः। तदनन्तरं सारस्वतातिथिभिः प्रो.डा.सत्यव्रतशास्त्रीमहोदयैः सर्वेषामतिथीनां स्वागतं विधाय प्रोक्तं यत् विगतवर्षीय - कौस्तुभपुरस्कारप्रदानाय निर्णायकैः ''श्रीगुरुमहाराजचरितम्'' इत्यस्य महाकाव्यस्य प्रणेतारः प्रो. डा. हरिनारायणदीक्षित-महाभागाः नेर्णीताः सादरमभिनन्दिताः।



कथितञ्च यदेतेषां सम्मानः संस्कृतसाधानायाः सम्मानः। एतेषां स्वनामधान्यानां दीक्षितमहोदयानां दीर्घमनामयं च जीवनं परमात्मने प्रार्थितम्।

सत्यव्रतमहाभागानामनन्तरं श्रीलालबहादुरशास्त्रीविद्यापीठस्य कुलपतयः डा. रमेशकुमारपाण्डेयमहाभागाः सर्वेषां सुरभारतीसमुपासकानां स्वागतं विधाय अकथयन् यत् विद्त्समागमैः अद्यतनीया सभा शरत्पूर्णिमायाः अवसरे रासलीलेव सुशोभते। सार्धमेव एतैः दीक्षितमहाभागानां नवनवोन्मेषकाव्यप्रतिभा प्रशंसिता। वैज्ञानिकभाषायाः संस्कृतस्याध्ययनम् अध्यापनं च संस्कृतमाध्यमेनैव भवेद् इतीच्छापि प्रकटिता।

तदनु श्री शंकराचार्यसंस्कृतमहाविद्यालयस्य अधिष्ठात्र्यः शशिप्रभाकुमारमहाभागाः पुरस्कारपरिचयाय मानपत्रपठनाय च संयोजकमहोदयैः मञ्चे आमन्त्रिताः। वेदमन्त्रेण स्ववक्तव्यम् आरभन्त्यः एताः महोदयाः पुरस्कारचयनसमितेः सदस्येभ्यः साधुवादं प्रदाय कृतभूरिश्रमेभ्यः दीक्षितमहोदयेभ्यः दीयमानस्य कौस्तुभपुरस्कारस्य विषये विस्तारेण ज्ञापयित्वा मानपत्रं पठितवत्यः यस्मिन् गीर्वाणवाणीसमुपासकानां दीक्षितमहोदयानां निवासशिक्षादीनां पूर्णपरिचयेन सार्धमेव महाभागैः अद्यावत्प्राप्तानां नैकानां पुरस्काराणामपि विस्तृतचर्चासीत्। तदा च मुख्यातिथयः। लब्धान्ताराष्ट्रियख्यातयः विद्वांसः प्रो. लोकेशचन्द्रमहोदयाः निदेशकमहोदयैः सह दीक्षितमहाभागेभ्यः मानपत्रं , पटलेखम् , उत्तरीयं , नारिकेलं , पुष्पगुच्छं , लक्षरूप्यकमितं च चैकपत्रं दत्तवन्तः। मुख्यातिथिमहोदयैः विदेशेषु यथा संस्कृतभारतीयसंस्कृतेश्च दर्शनं भवति तथा न भारते एतदभिलक्ष्य चिन्ता प्रकटिता। तदनन्तरं कोरियादेशीयैः कुम्भकावस्थायाम्लिखितम्। उङ्कार पटचित्रमपि सभायै दर्शितम्।

अन्ते कौस्तुभपुरस्कारेण सभाजिताः प्रो. हरिनारायणदीक्षितमहाभागाः निर्णायकमण्डलस्य, अध्यक्षाधिष्ठात्रीमहाभागयोश्च अभिनन्दनं व्याहृत्य सभायाः धन्यवादं कृतवन्तः। स्वपुस्तकस्य विषये पृष्टाः ते अवदन् यत् प्रकृतिरप्यात्मानं न जानाति, सुमनोऽपि स्वसौरभं न जानाति। अपितु ये जिघ्रन्ति ते एव तद्विषये जानन्ति एवमेव पुस्तकविषयेऽपि निर्णायकैः तु निर्णीतम्। अधुना अवशिष्टनिर्णयं तु पाठका एव करिष्यन्ति। सभायाः अन्तिमचरणे शङ्कराचार्यमहाविद्यालये प्रचलतः प्रयोजनमूलकस्य संस्कृतपाठ्यक्रमस्य प्रथमदवितीयसत्रयोः सफलपरीक्षार्थिभ्यः प्रमाणपत्राणि वितरितानि।

संयोजकमहोदयैः सर्वेषामभ्यागतानां धन्यवादज्ञापनेन सह सम्मेलनसमाप्तेः घोषणा कृता शान्तिपाठानन्तरं सर्वेभ्यश्च शुभकामनाभिः सम्मेलनमिदं सफलतया संपन्नमित्यलं विस्तरेण।

विवरणकर्त्री - श्रीमती लता अरोड़ा, वरिष्ठा संस्कृताध्यापिका ,
भारतीयविद्याभवनान्तर्गत मेहताविद्यालयः

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा
के लिए उत्तम कागज़, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुदित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुदित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुदित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# योगीआदित्यनाथस्य आह्वाने अयोध्यायाः रामपौड़ीघट्टे दीपोत्सवे त्रिलक्षसहस्त्रं दीपान्प्रज्वाल्य कीर्तिः स्थापिता

अयोध्या। कार्तिक कृष्ण चतुर्दशी दीपावल्याः अवसरे उ.प्रदेशस्य मुख्यमंत्री योगी आदित्यनाथस्य आह्वाहने अयोध्यायां रामपौड़ी घाटे दीप प्रज्वाल्य कीर्तिमानं स्थापितवान। योगी आदित्यनाथ रामस्य पौड़ी परिसरे त्रि लक्ष्य एक सहस्त्र दीपेन प्रकाशितवान। अस्मिन्नवसरे गीनीज बुक



रिकार्ड प्रतिनिधयः योगी आदित्यनाथं सर्वाधिक दीप प्रज्वालनस्य विश्व कीर्तिमान प्रयागपत्रं दत्तवान। अस्मिन्नवसरे दक्षिण कोरियायाः राज्यपाल लालजीटंडन विदेशराज्यमंत्री वी.के.सिंह व मन्त्रिमण्डलस्य अन्य सदस्येन सह मुख्यमंत्री पूण्य सलिला सरयु आरती कृतवन्तः।

सांस्कृतिक वैभव एवं पारम्परिक अनुरागस्य अस्निवसरे सरयु नद्यां अयं परिदृश्यः अलौकिक विस्तृतः असीत्।

उल्लेखनीयोऽस्ति यत् मुख्यमंत्री महोदयस्य आह्वाहने कार्यक्रमस्य प्रमुख शिल्पी अवध विश्वविद्वालयस्य कुलपति प्रो. मनोज दीक्षितस्य संयोजने अयं विश्वकीर्तिमान दीपोत्सवं मूर्त रूपं दत्तवान।

**प्रथमपुटस्य शेषभागः** 
## गुरुकुलशिक्षायाः ज्ञानगंगा

तेषां संरक्षणे समाजस्य संरक्षणं भवितव्यम्। गुरूकुल शिक्षा पद्धति सर्वोपरि वर्तते। इदानीं अस्य आवश्यकता अस्ति। बौद्ध मठस्य शिक्षा पद्धति तद्वदेव अस्ति। यत्र भ्रमणं करोति येन समाजे तस्य प्रभावः भविष्यति। तथा अनेन छात्रा शसक्त व सर्वे समस्यायाः निदानाय् सक्षमः भवति। अतः गुरूकुल पद्धति सर्वोपरि वर्तते। योगी गुरूकुल कुरूक्षेत्रस्य श्री गोपाल कृष्ण



गोशाला नवनिर्मित गोशालायाः उद्घाटनेन् कुरूकुल द्वारा प्रकाशित पत्रिकायाः विमोचनमपि कृतवान। अचार्य देवव्रतस्य प्रसंशा कृत्वा उक्तवान यत् ते गो संरक्षणं कृत्वा महानतम् कर्यं कृतवन्तः। ते समाजे प्रसारित कुप्रभावस्य विषयेऽपि प्रकासं दत्तवन्तः। इदानीं समाजस्य स्थिति दयनीय आस्ति। सर्वत्र नकारात्यक चिन्तकस्य संख्या अधिकोऽस्ति तर्हि इदानीमेव गुरूकुल शिक्षा पद्धत्या माध्यमेन एतादृशी चिन्तनस्य प्रभावः दूरी भविष्यति।

समारोहे अस्थल बोहर मोठस्य संचालक बाबा बालक नाथ, जूनागढ़ अखाड़ा परिषदस्य शेरनाथमहाराज, थानेसरस्य विधायक सुभाष सुधा, छपरौली विधायक सहेन्द्र रमाला, मा. रामपालआर्य, गुरूकुलस्य प्रधान कुलवन्तसिंहसैनी, राज्यपालस्य ओएसडी राजेन्द्र विद्यालंकार, उद्योगपति व समाजसेवी राकेशजैन, निदेशक व प्राचार्य कर्नल अरूणदत्ता, सहप्राचार्य शमशेरसिंह तथा अन्यजना उपस्थिता आसन्।

**पाठकानां कृते सूचनाः-**

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते।

वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar, Delhi-110053
IFC Code- IOBA0002249

# सांसदः मनोजतिवारी शिविरे गत्वा छठपर्वणः शुभकामना दत्वा गीतवान्

पूर्वी दिल्ली। भाजपा प्रदेश अध्यक्ष व उत्तरी पूर्वी देहली प्रदेशस्य सांसद मनोजतिवारी यमुनातटस्य विभिन्न छठसेना शिविरेषु गत्वा छठ व्रतियेषु गत्वा महापर्व छठस्य शुभकामना दत्तवान। सः सोनिया विहार एवं वजीराबाद क्षेत्रस्य विभिन्न शिविरेषु गतवान। तिवारी शिविरेषु छठपर्वस्य गीतं गीतवान।

तिवारी उक्तवान् यत् भगवान सूर्सस्य जन्मः माता अदितेः गर्भेनाभवत् एवं तत्पश्चात् तं मात्रा सह




एकस्मिन प्राकोष्ठे स्थापितवान परञ्च जन्मस्य षड् दिवस पश्चादेव भगवान सूर्यस्य शौर्यस्य तेजः असहनीयो जातः एतदर्थं त वहिः आनीतवान्। सुख समृद्धेः उपासनायाः रुपे वयं अद्यापि छठपर्व कुर्मः। केचन पूत्र प्राप्ति हेतु एवं केचन स्व जीवने समृद्धि हेतु भगवान सूर्य अर्ध्य दत्वा कामना करोति। ते उक्तवन्तः यत् भगवान सूर्य स्व आराध्य स्वीकृत्य वयं जीवने व्यक्तित्वस्य विकास कुर्मः एवं समाजस्य कल्याणाय तस्य सदुपयोगः कुर्मः। विधायक श्रीदत्तशर्मा, अध्यक्ष प्रमोदगुप्ता, भाजपा प्रदेश संगठनमंत्री सिद्धार्थन, पूर्वांचल मोर्चायाः प्रदेशाध्यक्ष मनीषसिंह, मीडिया विभागस्य सहप्रभारी नीलकांत बख्शी, सहप्रमुख आनन्द त्रिवेदी उपस्थिताः आसन्।

# अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य अन्तर्गते पाठ्यपुस्तकानां वितरणम्

नवदेहली। गुरूकुलपरिसरस्य चरक प्रेक्षागृहे राष्ट्रिय संस्कृत संस्थान नव देहली भारत सर्वकार माध्यमेन संचालित अनौपचारिक केन्द्रस्यान्तर्गत पाठ्यपुस्तकस्य वितरणं सम्पन्नो



जातः। येषु मुखतिथि उत्तराखण्ड आयुर्वेद वि.विद्यालयस्य कुलसचिव राजेशजी आसन् एवं अतिथिषु निदेशक परिसर, गुरूकुल परिसर प्रो. राघाबल्लभसतीजी, उपनिदेशक उत्तमशर्मा जी, प्रो. विपिनकुमारपाण्डेय, मिलित्वा पुस्तक वितरणं कृतवन्तः।

कार्यक्रमस्य संचालनं केन्द्रस्यमुख्यातिथि डॉ. संतोषकुमार कृतवम, कार्यक्रमे केन्द्रस्य सहसंयोजक डॉ. विपिनकुमार अरोड़ाजी, डॉशीतलकुमारवर्मा, डॉ. शैलेन्द्रप्रधान, डॉ. दीपशिखाजी, डॉ. भावनामित्तलजी डॉ. मयंकभटकोटीजी, डॉ. एस.पी.सिंहजी डॉ. राधाकृष्णविस्वालजी आदि शिक्षक व स्नातकोत्तर व स्नातक छात्र-छात्रापि उपस्थिताः आसन्।

डॉ. श्रेयांशः द्विवेदी
कुलपतिः
महर्षि-वाल्मीकि-संस्कृत-
विश्वविद्यालयः, कपिस्थलम्, 136027
हरियाणा सरकार

## (१) संस्कृतभारती

लक्ष्यं निधायैव विभाति नित्यम्,
संस्कारपूताश्च जनाः भवन्तु।
सञ्चिन्त्य सर्वत्र मुदा प्रयाति,
आभारतं संस्कृतभारती सा।।1

देशोह्यस्मदीयोह्यस्ति विभावयन्तु,
लोकास्मदीयाः सुविचिन्तयन्तु।
कर्तुं तथा सर्वविधं प्रयाति,
आभारतं संस्कृतभारती सा।।2

देशे विदेशे नगरे च वीथ्याम्,
ग्रामे गृहे सर्वजनाश्च दक्षाः।
सम्भाषणे स्युःसततं प्रयाति,
आभारतं संस्कृतभारती सा।।3

व्यासं च वाल्मीकिमितिप्रसिद्धम्,
बाणाश्चघोषौ कविकालिदासम्।
स्मृत्वैव भाषां सततं प्रयाति,
आभारतं संस्कृतभारती सा।।4

वल्गन्ति बालाश्च मुदा युवानः,
उद्योगिनः कर्मरताः सुधन्याः।
वैद्या विधिज्ञाः विविधाश्च नित्यम्,
आभारतं संस्कृतभारती सा।।5

## (२) गीताजयन्ती खलु पावयेन्नः

**( इन्द्रवज्रा )**

भूमण्डले भारतमद्वितीयम्, सर्वत्र गीता हरिते प्रदेशे ।
कल्याणकार्ये सततं समर्था, गीताजयन्ती खलु पावयेन्नः।।1।।

कृष्णेन गीतेति मुदा ब्रुवाणः, श्रीभिर्युतान् संस्कृतकर्मदक्षान्।
राज्यस्थितान् राज्यहितैषिणाँश्च, गीताजयन्ती खलु पावयेन्नः।।2।।

गीताजयन्तीमभिलक्ष्य राज्ये, आयोजनं रोहतके हिसारे।
कर्णालये जीन्दपुरे भिवान्याम्, गीताजयन्ती खलु पावयेन्नः ।।3।।

पानीपतेऽम्बानगरे सुरम्ये, सोनीपते वा यमुनानगर्याम्।
मेवातमध्ये सिरसानगर्याम्, गीताजयन्ती खलु पावयेन्नः ।।4।।

द्रोणस्य पुर्यां गुरुगाँवमध्ये, कौरव्यदेशे कुरुधाम्नि दिव्ये।
निर्धारिते झज्जरमध्यभागे, गीताजयन्ती खलु पावयेन्नः ।।5।।

नूनं फतेहे च फरीदबादे, सत्पञ्चकूलेति सुरम्यधाम्नि ।
गीतानिनादं खलु घोषयन्ती, गीताजयन्ती खलु पावयेन्नः ।।6।।

सेवारतायाथ गुणान्विताय, मनीषिवर्याय सुरक्षकाय ।
मान्याय कप्तानमहोदयाय, गीताजयन्ती खलु पावयेन्नः ।।7।।

धर्मान्विते ब्रह्मसरोवरे च, कर्मान्वितं मुख्यपदं प्रदत्तम्।
श्रीमाननीयाय मुदात्विताय, गीताजयन्ती खलु पावयेन्नः ।।8।।

सोत्साहपूर्णो हि महोत्सवश्च, आभारतं यो विहितोऽद्वितीयः।
राज्यस्य मानो बहुवर्धितश्च, गीताजयन्ती खलु पावयेन्नः ।।9।।

श्रीकृष्णभक्ताः ननु देशभक्ताः, राज्ये स्थिता मानवतासुपूर्णाः।
गीतामृतं पेयमनोहरञ्च, पीत्वा प्रसन्नाः हरियाणलोकाः।।10।।

गीता हृदिस्था ननु भारतीया, सरस्वती वेदपरायणेति ।
मुक्तस्वभावेन रवं करोति, गीताजयन्ती खलु पावयेन्नः ।।11।।

गीतोत्सवः शुद्धविवेकदोऽभूत्, संस्मारयन् वै भवतां पुरस्तात् ।
सुसंस्कृतज्ञान् ननु भारतीयान्, गीताजयन्ती खलु पावयेन्नः ।।12।।

विद्वद्वरेण्याः खलु प्रार्थनीयाः, विश्वस्तरीयां कवितां पठन्तु ।
विलिख्य सम्पठ्य सनाथयन्तु, सदास्मदीयां कृतकर्मदक्षाम्।।13।।

श्रीमत्सु विद्वत्सु गता सदैव, हस्तेषु वात्सल्यमवाप्य नूनम् ।
गीतात्मकं भारतद्धुतं स्यात्, सञ्चिन्त्यतां साधुजनाः समन्तात् ।।14।।

# सम्पादकीयम्

अयि अमरवाणीसमुपासकाः!

सादरं नमो नमः।

सुखदोऽयं शीतकालो मनो मोहयतीवास्माकमिति आनन्दकरं वृत्तमस्ति। शीतकाल एव कवीनां काव्यं स्फुरति। कम्बलसम्बलाः सुकवयः एव निजलेखन्या राष्ट्रं रक्षन्ति। सुविदितमिदं यत् भारतस्य गौरवं विश्वप्रसिद्धमस्ति। अस्य बहवो हेतवो वर्तन्ते। अत्रत्या संस्कृतिः परमनियमपूता विलसति। सर्वधर्मसमभावः, वसुधैव कुटुम्बकम्, आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः इत्यादिवचनामृतानि जनानां चेतश्चमत्कुर्वन्ति। राजापि प्रजासुखे सुखी प्रजादुःखे च दुःखी भवति। प्रजापालनमेवास्माकं राष्ट्रस्य नायकानां मूलं कर्तव्यमस्ति। राजा वा शासको वा सर्वविधोपद्रवशमनकारी यदि तदैव राष्ट्रं प्रगतिपथमारोहति। दैवीमानुज़ीणामापदां हर्तैव भर्ता नृपपदवाच्यो भवति। जानीमो वयं यदस्य देष्ठास्य मुनिभिः नृपैर्वा न केवलं मनुज़्यमेव रक्षन्ति, अपितु प्राणिमात्रसेवा एतेषां जीवने प्रमुखं भवति। एकस्य कपोतस्य रक्षार्थं महाराजेन शिविना आत्मदेवार्पणं कृतम्, दैत्यमारणाय मुनिना दधीचिना शरीरमेवार्पितं किं च वशिष्ठध ेनुरक्षणार्थं नृपतिना दिलीपेन स्वदेहार्पणं कृतमिति तेज़ां यस्विनां कीर्तिमेव वर्धयति। अनेन रूपेण राज्ञा भाव्यमिति निर्देष्ठो मन्तव्यः। एवरूपा एव शासकाः देशस्य सर्वविधकल्याणाय जनतया चेतव्याः। चितश्च शासकः स्वदेशस्य संस्कृतिं पुरातनीमावश्यकीमहेयां परम्परां संरक्षन् अहर्निशं जागरितस्तिष्ठेतिदति कामयामहे। न जनता लोभेन मोहेन भयेन स्वामूल्यं मतं कस्मैचिदपि नेत्रे दद्यात्। अपितु सम्यग्विचार्य देशसंचालकायैव मतं देयमिति संस्कृतसंवादस्य आग्रहो वर्तते। राष्ट्रसेवैव सर्वोपरि वर्तते। राष्ट्रसेवक एव शस्त्रेण बलेन बुद्ध्या कौशलेन वा रक्षां कर्तुं शक्नोति। उक्तं चापि

शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते।

अस्तु एतावदेवोक्त्वा सर्वविधं कल्याणं कामयमानाहं संस्कृतसंवादपक्षतः शुभकामनां करोमि।

जयतु संस्कृतं जयतु भारतम्

# वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः।
द्रप्सा मध्वश्चमूषदः।।४।।

अर्थ-ईश्वर सब मनुष्यों के प्रति कहता है कि जो मेरे रचे हुए पहले मन्त्र में प्रकाशित किये बिजुली आदि पदार्थों से ये सब पदार्थ, धारण करके मैंने पुष्ट किये हैं, तथा जो मनुष्य इनसे वैद्यक वा शिल्पशास्त्रों की रीति से उत्तम रस के उत्पादन और शिल्प कार्यों की सिद्धि के साथ उत्तम सेना के सम्पादन होने से रोगों का नाश तथा विजय की प्राप्ति करते हैं, वे लोग नाना प्रकार के सुख भोगते हैं ।।४।।

अब अगले मन्त्र में अग्नि शब्द से ईश्वर का उपदेश किया है–

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः।
हविष्मन्तो अरकृतः।।५।।

अर्थ-हे सृष्टि के उत्पन्न करनेवाले परमेश्वर ! जिस आपने सब प्राणियों के सुख के लिए सब पदार्थों को रचकर धारण किया है, इससे हम लोग आप ही की स्तुति, सब की रक्षा की इच्छा, शिक्षा और विद्या से सब मनुष्यों को भूषित करते हुए उत्तम क्रियाओं के लिए निरन्तर अच्छी प्रकार यत्न करते हैं ।।५।।

ईश्वर के रचे हुए बिजुली आदि पदार्थ कैसे गुणवाले हैं, सो अगले मन्त्र में उपदेश किया है-

घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः।
आ देवान्त्सोमपीतये।।६।।

अर्थ-जो मेघ आदि पदार्थ हैं, वे ही जल को ऊपर-नीचे, अर्थात् अन्तरिक्ष को पहुँचाते और वहाँ से वर्षाते हैं और ताराख्य यन्त्र से चलाई हुई बिजुली मन के वेग के समान वार्ताओं को एक देश से दूसरे देश में प्राप्त करती है। इसी प्रकार सब सुखों को प्राप्त करानेवाले ये ही पदार्थ हैं, ऐसी ईश्वर की आज्ञा हैघ्६घ्
द्य यह छब्बीसवाँ सर्ग समाप्त हुआ। अब अगले मन्त्र में अग्नि शब्द से ईश्वर का उपदेश किया है-

# मुहूर्तशास्त्रे गोधूलिलग्नविचारः

**डॉ.वेदप्रकाशपाण्डेयः**
ज्योतिषाचार्यः
राजकीयसंस्कृतमहाविद्यालयः
नाहन-सिरमौरः (हि.प्र.)

द्वादशलग्नानि सन्ति । तत्र किं लग्नं गोधूलिलग्नमित्यस्मिन् विज़ये आचार्यैः कथितम् -

**अर्धास्तात्पूर्वमप्यूर्ध्वं घटिकार्धं तु गोरजः ।**
**स कालो मङ्गलः श्रेयान् विवाहादौ शुभप्रदः ॥**

इति मुहूर्तगणपतिः

मुहूर्तमार्त्तण्डेऽपि - **रवेरर्धास्तात्परपूर्वतोऽर्धघटिकम्** ।

परञ्च पीयूषधारायां तु सूर्यास्तानन्तरं घटिकाद्वयं गोधूलिकालः कथितः। यथा -

**यावद्दिनान्ते निशि पश्चिमायां पश्येत्तष्टतीयं रविबिम्बभागम् ।**
**तस्मात्परं नाडिकयुग्ममेके गोधूलिकालं मुनयो वदन्ति ॥**

अत्रापि देशाचारव्यवस्थैव प्रमुखा वर्तते । कश्चित् स्थाने सूर्यास्तबिम्बात् प्राक्पश्चाच्च घटिकादलस्य ग्रहणं भवति । कष्ठिचच्च स्थाने सूर्यास्तादनन्तरं घटिकाद्वयोर्ग्रहणं भवति।

कुत्रचित्तु ऋतुभेदानुसारं अथवा वारभेदानुसारं मुहूर्तगणपतौ द्रज़्टव्यम् -

**निदाधे सार्धबिम्बेऽर्के पिण्डीभूते हिमागमे ।**
**मेघकाले तु पूर्णेऽस्ते प्रोक्तं गोधूलिकं स्मृतम् ॥**

तत्र वारानुसारं ज्योतिर्निबन्धकारस्य वचनम् -

**अनागतेऽर्केऽर्कदिने ष्टानौ व त्रिभागनष्टे शशिशुक्रयोश्च ।**
**सूर्यार्द्धबिम्बे शुभदं च जीवे लग्नं कुजे ज्ञे च मुखं रजन्याः ॥**

**वासराः-ग्राह्यलग्नकालः ।**
**सूर्यष्ठानी - सूर्यस्तात् पूर्वः ।**
**चन्द्रशुक्रौ - त्रिभागनष्टे सूर्यबिम्बेसति ।**
**गुरुः- सूर्यार्द्धबिम्बे दृष्टे सति ।**
**भौमबुधौ - सूर्यास्तादनन्तरो रात्र्यारम्भयावत्**

आचार्यकेशवार्कस्तु कथयति यत् यदा गावः स्ववत्सान् द्रष्टुं सायंकाले वनेभ्यः गृहान् आगच्छन्ति । तदा तेषां धूलयोः गोधूलिकालः कथ्यते । निश्चयेन गोधूलिलग्नस्य अयमेव कालः उचितः यथा नाम्ना बोधो भवति। मतानुसारं गोध ूलिलग्नं हीनवर्णेभ्यः विशेषफलप्रदमस्ति। यथा ज्योतिर्निबन्धकारस्य वचनम् -

**घटीलग्नं यदा नास्ति गोधूलिकं शुभम् ।**
**शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन् ॥**

मुहूर्तमार्तण्डकारस्य कथनम् -

**गोधूलिः पादजातके हितकरम् ॥**

नारदादिप्राचीनाचार्याणां मतानुसारेण गोधूलिलग्नं प्राच्यानां कलिङ्गानां कृते तथा गान्धर्वादिविवाहेषु उचितं वर्तते।

परञ्च अत्यावश्यकतायां तु सर्ववर्णेभ्यः गोधूलिकं शुभम् । यथोक्तमादौ एव तथा च -

**विप्रेषु घटिकालाभे दातव्यं गोरजो बुधैः ।**
**संकीर्णे गोरजः शस्तं परेषु द्वितयं शुभम् ॥**

गोधूलिलग्नस्य प्रशंसा सर्वत्र दृश्यते । सर्वेषु कार्येषु पशस्तोऽयं कालः गोधूलिलग्ने नक्षत्रतिथिकरणवारनवांशलग्नजामित्रादीनां विचारोऽपि न क्रियते ।

यथा मुहूर्तचिन्तामणिकारः -

**नास्यामृसं न तिथिकरणं नैव लग्नस्य चिन्ता ।**
**न वारो न च लवविधिर्नो मुहूर्तस्य चर्चा ॥**
**नो वा योगो न मृतिभवनं नैव जामित्रदोषो**
**गोधूलि सा मुनिरुदिता सर्वकार्येषु शस्ता ।**

यद्यपि गोधूलिलग्नस्य विज़ये कथितं यदत्र कोऽपि दोषो न भवति। तथापि अस्मिन् लग्ने षष्टाष्टमचन्द्रस्य दोषस्तु केचन् आचार्याः कथ्यन्ति।

**कुलिकं क्रान्तिसाम्यं च मूर्तौ षष्टाष्टमः शशी ।**
**पञ्चगोधूलिके त्याज्या अन्ये दोषाः शुभावहाः ॥**

पीयूषधारायाम् -

**षष्ठेऽष्टमे मूर्तिगते शशांके गोधूलिके मृत्युमुपैतिकन्या ।**

एतैः प्रमाणवचनैः सिद्धयति यत् केचनाचार्याः गोधूलिलग्ने षष्टाष्टमचन्द्रं सर्वथैव त्यजन्ति । परञ्च मतमिदमुचितं न प्रतीयते। यतो हि विवाहलग्ने सप्तमस्थाने कोऽपि ग्रहः शुभो न भवति। यथा मुहूर्तसंग्रहदपर्णकारः कथयति -

**सप्तमस्थानगाः सर्वे ग्रहाः कुर्वन्ति शीघ्रतः ।**
**दम्पत्योर्मरणं यद्वा स्यादेकस्य न संशयः ॥**

अपरञ्च सूर्यसम्बन्धे कथितम् -

**मदनमूर्तिशयः शयसंग्रहे मृगदृशामशनिः ।**

अर्थात् विवाहलग्ने प्रथमस्थाने अथवा सप्तमस्थाने स्थितः सूर्यवज्रवत् कष्टप्रदो भवति ।

परञ्च गोधूलिलग्ने तु सूर्यो लग्नात् सप्तमस्थाने एव भवति। यतोहि गोधूलिलग्नं सायंकाले सूर्यास्तसमये भवति तथा तत् सप्तमसूर्यो लग्नात् षड्राश्यन्तरे स्थितो भवति तथा तत् सप्तमस्थानमेव । अतः यदा गोधूलिलग्ने सप्तमस्थानस्य सूर्यस्य त्यागो न भवति तदा षष्टाष्टमचन्द्रस्य त्यागः कथम्?

गोधूलिलग्ने नवांश यदि स्वस्वामिना दृष्टियुतो न भवेत् तदापि दोज़ो न भवति। शनिराहुसूर्यभौमादीनां क्रूरग्रहाणां योगेन अपि लग्नमिदं न भङ्गं भवति। तदा केवलचन्द्रचारस्य भयं कथमस्तु। यथा विवाहवृन्दाकारस्य कथनम् -

**नांशो न लग्नमिह दृष्टयुतं स्वभर्त्रा नार्कारसौरतमसामपि संगभङ्ग ।**
**किं चन्द्रचारभयमेकनिहास्तु किंचिन्नात्र प्रमाणवचनं किमपि श्रुतं न ॥**

अतः यदा गोधूलिलग्ने अन्येषां दोषाणां विचारो नैव भवति। तदा षष्टाष्टमचन्द्रस्य विचारोऽपि नोचितः। तथा अस्मिन् चन्द्रचारविषये प्राचीनग्रन्थेष्वपि प्रमाणवचनं न प्राप्यते । इति ।

# हनुमदष्टकम्

**-मार्कण्डेयो रवीन्द्रः**

दशाननस्य काञ्चनेन निर्मितं पुरं हि यत्
ददाह लीलया सुसेवको रघूत्तमस्य तत्।
विदेहनन्दिनीकृपाष्टसिद्धिदायकं प्रभुं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(1)

रघूत्तमः स राघवः हृदि स्थितो हि मारुतेः
ददर्श मानसं विदार्य कोशलेशराघवम्।
भयङ्करो निशाचराय जानकीकृते लघुः
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(2)

करे च सौषधं गिरिं दधाति वायुनन्दनः
गदायुधः प्रयाति वानरोऽन्तरिक्षमण्डले।
नमन्ति नारदश्च शारदा वसुन्धराधरो
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(3)

गुणाकरं महाकपिं भटं दिनेशभक्षकं
पिशाचभूतघातकं विपद्गतस्य रक्षकम्।
कचैश्च कुञ्चितैः सुशोभितं खमार्गगामिनं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम् ।।(4)

विभीषणस्य वानराधिपस्य चोपकारकं
निशाचरेशरावणस्य वाटिकाविनाशकम्।
महीधरस्य धारकञ्च लक्ष्मणस्य रक्षकं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(5)

यदा रसातलस्य रावणः प्रगृह्य सानुजं
प्रभुं कुलेश्वरीसमर्चनाय याति मन्दिरम्।
हतो वनौकसा तदा ससैन्यदानवश्च तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(6)

हता च येन लङ्किनी तथाक्षयो रिपोः सुतः
प्रजापतेश्च गौरवे विधातृपाशबन्धनम्।
निकेतने दशाननस्य निर्भयो स्थितो हि तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(7)

बलं न दुर्बलो जनो मनीषया हि वञ्चितो
धनं न निर्धनस्ततो न बान्धवाः न सुहृदः
स एव रक्षकः स एव पालकस्ततो हि तं
नमामि वायुपुत्रमौरसं शिवांशजं कपिम्।।(8)

छन्दः-पञ्चचामरम्

# पद्मपुराणस्य क्रियायोगखण्डे प्रयागमाहात्म्यम्

-डॉ अरविन्दकुमारतिवारी

भारतीयसंस्कृतेः प्राणभूता वेदाः पुराणमार्गेणैव स्वसनातनयात्रां साधयन्तीति वदतो मे नैव सङ्कोचो मनसि भवति। पुराणानां कथा मनोरमा मानवानां जीवनाय अतीव ग्राह्या वर्तन्ते। कथाब्याजेन महाकविर्व्यासः सर्वानपि विषयान् विवृणोति। अष्टादशपुराणेषु द्वितीयं स्थानं लभते पद्मपुराणमिति जानीमो वयम्। अत्र सप्तखण्डा विलसन्ति। पञ्चपञ्चाष्ठात्सहस्रमिताज़्लोकाः पुराणमिमलङ्कुर्वन्ति। सष्टज़्टिपातालादिखण्डेज़ु अनेके विज़या वर्णिता विमोहयन्ति चेतांसि विदुषामिति। अहमद्य पद्मपुराणस्य क्रियायोगखण्डे प्रयागस्य माहात्म्यमिति विज़यमवलम्ब्य स्वविचारान् प्रस्तौमि।

मान्याः! आदिकालादेव भारतीयानां पवित्रं धाम प्रयागः पुण्यप्रदानाय तत्परोऽस्ति। सद्य एव गतदिवसेषु यशस्विना मुख्यमन्त्रिणा आदित्यनाथेन योगिना अस्य नाम पुनरपि आनीतमिति विज्ञाय कस्य चेतो न विकसति कमलमिव। धन्या वयं नाम्नः सङ्कीर्तनेनास्य। मन्ये पञ्चशतं वर्षाणि यावदस्य नाम एव विलुप्तमिवासीदिति भाषन्ते संस्कृतिसंरक्षकाः। वदन्ति बहवोऽनभिज्ञा यन्नाम्ना किं भवति? सत्यमेतत् अयमेव प्रष्ठनः पृष्टः केनचित् तदा योगिमहोदयः उत्तरमददात् यत् यदि नाम्ना न किमपि भवति तदा भवदीयं नाम भवतः पित्रा रावण इति कथं न कृतम्। अस्तु अयं तावदर्थवादो विरमतु। विषयवृक्षमारोहामः। किमस्ति वैशिष्ट्यमस्य प्रयागस्य कथं वा मुनिभिः तत्र तपस्तप्तम्, कथं सूर्यचन्द्रग्रहणेषु मकरसङ्क्रान्तिपर्वणि जनैस्सङ्गमे स्नानं क्रियत इति सर्वमपि चिन्तनीयमस्ति। अतएवायं विषयो मयारविन्देन गृहीतो राष्ट्रियव्याससमारोहायेति।

अयि पौराणिकाः! एषां प्रश्नानां समाधानं महाकवेर्व्यासस्य पद्मपुराणस्य अन्तिमे खण्डे क्रियायोगाख्ये तत्रापि चतुर्थाध्याये प्राप्यते। पृच्छति महर्षिर्जैमिनिर्यत्--

गङ्गाद्वारस्य माहात्म्यं त्वत्प्रसादाच्छ्रुतं मया।
प्रयागस्य च माहात्म्यमिदानीं श्रोतुमिष्यते।। 1
गङ्गाब्धिसङ्गमस्यापि माहात्म्यं कथ्यतां मुने।
न सम्यक् कथितुं कोऽपि शक्नोति त्वदृते क्षितौ।। 2

सुस्पज़्टमिदं यद् गङ्गाद्वारस्य माहात्म्यवर्णनश्रवणान्ते मान्यो जिज्ञासुर्जैमिनिः जिज्ञासते प्रयागमाहात्म्यम्, एतदपि वदति यत् हे मुने! त्वामतिरिच्य न कश्चिदपि पृथ्व्यां प्रयागमाहात्म्यस्य साधु वर्णनं कर्तुं शक्नोति। एतन्निशम्य भगवान् व्यासो विवृणोति। हे वत्स जैमिने! अहमपि गङ्गाब्धिसङ्गमप्रयागस्य फलं सम्यग् वक्तुं शक्तो नास्मि, हे द्विज! सङ्क्षेपाच्छावयामि। महर्षिणोच्यते यत् कोटिब्रह्माण्डेषु यावन्त्यपि तीर्थानि विद्यमानानि सन्ति तावन्ति सर्वाण्यपि मिलित्वा प्रयागस्य रूपं लब्धुं नैव शक्नुवन्ति। गङ्गायमुनासरस्वतीनां सङ्गमे प्रयागो विराजत इति सर्वेऽपि देवा मुक्तकण्ठेन प्रशंसन्ति। यथा-

कोटिब्रह्माण्डमध्येषु यानि तीर्थानि वै मुने।
प्रयान्ति तानि सर्वाणि प्रयागप्रतिमां तु किम्।। 3
गङ्गायमुनायाश्च सरस्वत्याश्च सङ्गमे।
प्रष्ठांसन्ति सुराः सर्वे ब्रह्मविष्णुशिवादयः।। 4

एतदनन्तरं प्रयागस्य माहात्म्यं वर्णयन् महाकविर्हृदयं प्रसारयति। अत्रैव अस्माकं मुनीनां संस्कृतिं प्रति दर्शनीया श्रद्धा व्यक्तीभवति। यद्यपि घोरकलिकालविनष्टमतयो वक्तारश्श्रोतारो वयं चतुरा वदिष्यामो यदयमर्थवादो वर्तते तथापि मन्मानसं किञ्चिदन्यदेव विभावयति। श्रूयतां महर्ज़िवचनम्। तद्यथा-

मकरस्थे रवौ माघे स्नानं ये तत्र कुर्वते।
तेज़ामागमनं नास्ति विष्णुलोकात्कदाचन।।
गवां कोटिसहस्राणि वाजिमेधमुखाध्वराः।
मेरुतुल्यसुवर्णानि दानान्यन्यानि च द्विज!।।
कुरुक्षेत्रे पुष्करे च प्रभासे च गयासु च।
हुत्वा दत्वा च विप्रेभ्यो यत्फलं प्राप्तयते बुधैः।।
माघे स्नात्वा प्रयागे तु तस्मात्कोटिगुणं भवेत्।
तस्मात्समस्ततीर्थानां प्रयागः परमः स्मृतः।। 5

अतएव प्रयागो भारत एव नापितु सम्पूर्णेऽपि संसारे तीर्थराज इति विशेषणेन गीयते कीर्त्यते चेति। सत्यं कृतमस्य नाम प्रयागः इति। बन्धवः! समीक्षकाः! अवष्ठयमेव सवैरपि जनैरत्र माघमासे मकरसङ्क्रान्तौ च स्नानं करणीयम्। सर्वेज़ामपि तीर्थानां राजायं केवलं स्नानमात्रेण तत्फलं यच्छति यत्फलं बहुदानेन महता यज्ञेन च लभ्यते। सत्यतेतदेव कारणमस्ति यस्मात् महाकविर्वन्दनीयचरणाकमलस्तुलसीदासः श्रीरामचरितमानसे वर्णयति बालकाण्डे यत्-

बटु विस्वास अचल निज धरमा। तीरथराज समाज सुकरमा।
अकथ अलौकिक तीरथराऊ। देई सद्य फल प्रगट प्रभाऊ।।
सुनि समुझहिं जन मुदितमन मज्जहिं अति अनुराग।
लहहिं चारि फल अछत तनु साधु समाज प्रयाग।। 6
मज्जन फल पेखिअ ततकाला। काक होहि पिक बकउ मराला।।
सुनि आचरज करै जनि कोई। सत्संगति महिमा नहिं गोई।।

अयं महिमा वर्तते प्रयागस्येति को न जानाति। अतः प्रमतिभिः संशय आश्चर्यो वा नैव करणीयः। तीर्थाटनं श्रद्धाया विज़यो भवति न तु तर्कस्येति। वन्द्यो महर्षिर्व्यासो लिखति यत् एकवारमपि यो जनः प्रयागे स्नाति स पुण्यवान् भवति। मकरस्थे दिवाकरे य एकदिनमपि तिष्ठति प्रयागे माघमासे तत्फलेन कल्पशतं यावत् विष्णुना सह निवसन् सुखं लभते।

महाकवेरिदं वचनं निशम्य चेतः प्रसन्नं भवति तद्यथा-

गङ्गायमुनयोस्तोये स्नानं येन कृतं सकृत्।
सद्यस्तद्दर्शनात् पापैर्मुच्यते सर्वपातकैः।। 7

सर्वेषामपि मनःकामनापूरकः प्रयागः कथं न तीर्थराजो वर्तते। प्रोक्तं मुनिना यत् यमभिलाषं हृदि निधाय मानवास्तत्र गता यज्ञं कुर्वते, तत्सर्वमपि लभन्ते। यथा

यजन्ति मानवास्तत्र यद्यदिष्ट्वा कलेवरम्।
सद्यो लभन्ते विप्रर्षे! तत् तद् देव न संशयः।। 8

प्रयागमाहात्म्यवर्णनप्रसङ्गे महर्षिणा इतिहासः श्राव्यते तीर्थस्येति। अयमितिहास आश्चर्यकरः प्रतिभाति। तदिह सङ्क्षेपेण श्रूयताम्। एकः प्रणिधिर्नामको वैश्य आसीत् यस्य धर्मपरायणा पत्नी पद्मावती पतिव्रतासीत्। सर्वगुणसम्पन्नासौ पतौ वाणिज्यार्थं विदेशं गते सखीभिः सह स्नातुं सरोवरं गता।

सखीभिस्सह विप्रर्षे जगाम स्नानहेतवे।
ततो धनुर्ध्वजो नाम स्वयं च पातकाश्रयः।। 9

अयं पातकः धनुर्ध्वजः स्नानं कुवतीमिमामालोक्य स्मरातुरो येन केन प्रकारेण तां लब्धुमकामयत। किन्तु तस्याः सखीभिर्निन्दितो बोधितः सविनोदं यत् यदीमां प्राप्तुमीहसे तदा गङ्गायमुनयोः सङ्गमे शरीरं त्यज।

यद्येतां रमणीं नूनमिच्छसि त्वं सुदुम्मर्ते।
गङ्गायमुनयोः शीघ्रं शरीरं सङ्गमे त्यज।। 10
ततः किञ्जातमिति श्रूयताम्
ततोऽसौ श्वपचो मोहाद् ब्रह्महत्यासहस्रकृत्।
गङ्गायमुनयोस्तोये तामिष्ट्वा पञ्चतां गतः।। 11
अहो तीर्थे प्राणत्यागस्य फलं विलक्षणम्,
तत्स्वामिसदृशाकारः समस्तगुणवान्बली।। 12

अयं तस्याः पत्या सदृशस्सन् तद् गृहमायातः। तस्मिन्नेव क्षणे तस्य पतिरपि वणिगागतः। उभौ समानौ विलोक्य सा विस्मिताभूत्। तया भगवान् प्रार्थितः।

नमामि गोविन्दमनन्तमूर्तिं शक्रादिदेवार्चितपादपद्मम्।
योगेश्वरं योगविदां निरीहं योगप्रदं योगिभिरर्चनीयम्।। 13

अनया संस्तवो भगवतो दष्ठाधिकपद्यैः कृतो वर्तते। प्रसन्नेन भगवता समुपदिष्टं यत्

भ्रमं जहीहि चार्वङ्गि द्वावेतौ हि पती तव।
एवकभावेन सुश्रोणि कुरु सेवां तयोः सदा।। 14
यष्ठच ते प्रणिधिः स्वामी मद्भक्तस्तरुणः सुधीः।
भोक्तुं तत्फलं साध्वि सोऽभवद् द्विविधः स्वयम्।। 15

अनेन प्रकारेण प्रयागमाहात्म्यं बोध्यं मनुजैरिति। अतः तीर्थप्रभाववैचित्र्यात् न भेतव्यम्। नैव च कलिचक्षुज़ा विलोकनीयमेव। अनन्तरमस्मिन्न्ध्याये सा साध्वी भगवता सह विष्णुपुरीं गच्छन्ती विचित्रं दृश्यमवालोकयत्। तत्रापि एका लघ्वी कथा समुत्पन्ना यस्याः सारो वर्तते यत् कियानपि पापी जनः प्रयागादितीर्थस्नाने मुक्तिं भजमानः सुखी भवतीवेति । निर्मलमतयो विद्वांसः! एवं प्रकारेण प्रयागस्य माहात्म्यं पद्मपुराणस्य क्रियायोगखण्डानुसारं वर्णितम्। किमधिकं महाकविना कालिदासेनापि प्रयागस्य महिमानं वर्णयता प्रोक्तमस्ति यत-

समुद्रपत्न्योर्जलसन्निपाते
पूतात्मनां चात्र किलाभिषेकात्।
तत्त्वावबोधेन विनापि भूयः
तनुत्यजां नास्ति शरीरबन्धः।। 16

अतः मान्याः कथन्न पुराणवचनमङ्गीकुर्वद्भिरस्माभिरपि गङ्गायमुनासङ्गमे विश्वशान्तये शत्रुबुद्धिपरिष्काराय स्वाभिलाषपूर्तये च सुदिने स्नानं करणीयमेव। येन सर्वत्र शान्तिसाम्राज्यं प्रसरेदिति कामयमानः स्ववक्तव्यं समाप्नोमि।

अमरवाणी विजयताम्।

सन्दर्भाः
1 पद्मपुराणे चतुर्थाध्याये 1 श्लोकः।
2 तत्रैव 2 श्लोकः।
3 तत्रैव 4 श्लोकः
4 तत्रैव 5 श्लोकः
5 तत्रैव 6 तः 9 श्लोकं यावत्
6 तत्रैव 2 दोहा बालकाण्डम्
7 तत्रैव पद्मपुराणे 4 17
8 तत्रैव 19 9 तत्रैव 34
10 तत्रैव 48
11 तत्रैव 50
12 तत्रैव 51
13 तत्रैव 57
14 तत्रैव 69
15 तत्रैव 70
16 रघुवंष्ठो 13/58

संस्कृतप्रवक्ता
आदर्शवैदिकविद्यालयइण्टरकालिजं, नंगला-सिनौली, बागपतम्




## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# ऋतुकाव्यम्



–पण्डित श्रीव्रजकिशोरत्रिपाठी
(ब्रह्मपुरम्, ओडिशा)

## ग्रीष्मखण्डम्

(1)
श्रीसूर्यः सकलेश्वरो दिनकरश्चन्द्रस्तदंशोज्ज्वलः
सर्वर्तुर्भुवि जायते तदयनात्तेषां परीवर्त्तनम्।
भूतेशो भुवनाधिपो ग्रहपतिर्लोकैकनाथो विभुः
विश्वारोग्यकरो महाद्युतिधरः पायादपायाज्जगत्॥
(2)
चैत्रान्ते मलयप्रवाहसमये ग्रीष्मो महाकर्कशः
तत्तप्तांशुचयेन मर्त्यभुवनं प्रायाति दर्पेण सः।
तस्योष्णेन महीतलं विचलितं सर्वे गताः शङ्किता
दुर्वारं बलशालिनं जनगणो दृष्ट्वा पुरस्ताद् यथा॥
(3)
उत्तापी पवनः प्रतापिकिरणः कालेश्वरः श्रीरविः
निःशुष्का धरणी नदी कृशतनुः का वा मरूद्भासिनी।
वृक्षाली मलिना यथा विरहिणी नारी गृहोत्तापिनी
तस्माद्वै पशवस्तदीयनिकटं यान्ति प्रबोधाय किम्॥
( ?)
निर्दीर्णा वसुधा तृणादिरहिता खल्वाटनारी समा
सा कस्मिन् कृषकैः सुशस्यभरिता कूपोदकेन क्व वा
खाद्याभावविवाधितास्तृणभुजो गावादयो दुर्बला
दूरूपा प्रकृतिर्यथा गतपतिः सीमन्तिनी दृश्यते॥
(5)
निर्वायुर्दिवसे प्रचण्डसमये स्वेदाढ्यलोको मुहुः
ग्रीष्माभीतमनास्तथापि चलति स्वक्षेत्रकर्म प्रति।
उष्णीषं निजमस्तके विलसति प्रोष्णाय किञ्चित् क्षणं
हे वर्षातरुणीमणे तव दया नो वा कथं जायते॥
(6)
ग्रीष्मोत्तापभयं तदंशुजनितं घातं च घर्मादिकं
नादृत्य श्रमिकास्तथाच कृषका गच्छन्ति क्षेत्रादिकम्।
सानन्दं कृषिकर्मधर्मनिरताः शष्यादिसंवृद्धये
सर्वे चेन्निजकार्यसाधनपरा देशे सुखं नर्तिता॥
(7)
छात्रा वै गृहदूरदर्शनपटं पश्यन्ति जालं मुहुः
कस्मिन् वा भविता प्रकाश समयः किं मे परीक्षाफलम्।
एवं भावविलोडिताः सुफलितं नृत्यन्ति दृष्ट्वा भृशं
यो यस्मिन् श्रमिकस्तदीयसुफलं प्राप्नोति नूनं क्षितौ॥
(8)
छात्रा मन्दफला विरागहृदयाः पित्रादिभिर्दुःखिताः
प्राप्ता ये सुफलं विचिन्तितहृदः किं वा पठिष्याम्यहम्।
पित्रोर्भिन्नमतं गुरोश्च विमतं मित्रस्य भिन्नं मतं
स्वस्याप्यन्यमतं ततो निजगृहे द्वन्दायते किं न वा॥
(9)
लोकास्यात्र विकर्त्तनो विकृतहृद् ग्रीष्मप्रवाहैर्ध्रुवं
तेजःकर्त्तरिकाकरैः प्रकुरुते क्रोधात् स किं कर्त्तनम्।
प्रातर्वर्त्तुलतां प्रशान्तविषयं त्यक्त्वा कथं क्रूरतां
स्वीकृत्य प्रहिणस्ति दानवसमः क्रन्दन्ति सर्वे भृशम्।।
(10)
वायुर्वह्निसमः कदा वहति वै वात्या कराली कदा
धूलीयुक्तसमीरणः प्रलयकृद् भीतिप्रदो वा कदा।
वैशाखीति कदा महाभयकरी चायाति मेघेन सा
भूयः शीतलमन्दमारुतवरो लोकोपकारी कदा॥
(11)
तापाद्भीतजनाः कदा जनपदे दुर्घूर्णिवात्याबलात्
क्षेत्रं नष्टगतं गृहादिपतितं क्रन्दन्ति दृष्ट्वा मुहुः।
दुःखस्योपरि दुःखभारमनिशं किं वा करिष्याम्यहं
हा दैवं मम जीवनं नयति नो नानाभयापीडितम्॥
(12)
मध्याह्ने खररश्मिरश्मिपतनाद् वह्निप्रभा धूलयो
मार्गे नो पथिकः क्षमः प्रचलितुं युक्तोपि पादावृतैः।
छात्रा नूतनकौशलेन वदनं चाछाद्य यान्ति द्रुतं
किं वातङ्ककरा भ्रमन्ति मनसि प्रायाति शङ्का तदा॥
(13)
सूर्यः क्रोधमुखोथवा प्रलयकृत्तापोधुना वर्षति
वह्निर्वर्षति वा प्रचण्डकिरणैर्न प्रत्ययो जायते।
किं वा द्वादशविग्रहैः प्रतपते दिव्यं धरावक्षसं
दृष्ट्वा तप्तगुणं जना विमुखिनः पश्यन्ति मेघं मुहुः।।
(14)
आच्छाद्याननहस्तयुग्मसहितं मुण्डं पिधायांशुकै
रारोह्यापि नवीनयानमतुलं गच्छन्ति निःशङ्कया।
चक्षुस्त्राणपिधायिका युवतयः स्वीयं कटुम्बं गुरून्
मान्यान् वा न च मानयन्ति नितरां दुःखं लभन्ते ध्रुवम्॥
(15)
सर्वं तप्तकटाहभावभरितं द्रव्यं च पात्रादिकं
पर्यङ्कं वसनं गृहं गृहतलं कुड्यं ज्वरापीडितम्।
स्नानं तप्तजलेन लोकविमुखा नोष्णोदकं तत् खलु
तस्मात् भीतजनाः प्रभातसमये गच्छन्ति खातादिकम्॥
(16)
स्नानार्थं ससुखं विधाय रुचिरं कुण्डं स्ववासान्तिके
केचिद् वासगृहान्तरे निजधिया केचित् स्वसौधोपरि।
ग्रीष्मोत्तापविनाशनाय नितरां भोगार्थिनः स्नान्ति ते
नद्यादिं प्रचलन्ति निःस्वमनुजा स्तेषां सहायो रविः॥
(17)
ग्रीष्मर्तौ जलकष्टनष्टविषये कृत्वा धुनौ कूपकं
स्वच्छाम्भोग्रहणाय हृष्टहृदयस्त त्तीरवासी जनः।
धन्यो यस्य नदीतटे जनपदं पुण्यं जलं सेवते
कूलेतो नगरं तथा जनपदं विश्वे ततो राजते॥
(18)
सायंकालसमागतेन मनुजा गच्छन्ति तस्यास्तटं
सेवन्ते बहुकोमलं सुपवनं ते भाग्यवन्तो जनाः
नानामोदविमोहिताश्च सकला यावत् प्रदोषं भवेत्
स्नानादिं च विधाय हृष्टमनसाऽऽगच्छन्ति ते स्वालयम्॥
(19)
आरामेषु विराजते हृदयहृद् दिव्यप्रभं पाटलं
सन्ध्यातः परिदृश्यते प्रतिदले मल्लिर्मनोहारिणी।
हट्टे तत्सुरभिं विलोक्य जनता क्रीणाति नेतुं गृहं
देवान् पूजयति प्रपानकजले स्वादाय संरक्षति॥
(20)
प्रातःकालमनोहरं दिशि दिशि ह्लादो वरीवृद्ध्यते
वृक्षाली व्रतती स्वयं कुसुमिता मोदेनुषा वन्दते।
काकाः काकलिभिस्तदीयसुतनौ राजन्ति मालासमा
यावत्तप्तकरो न भाति भुवने सर्वत्र तावत्सुखम्॥
(21)
देवाशीर्जनतासुखाय सततं शास्त्रे प्रसिद्धिर्यतः
संक्रान्तिर्विषुवाख्यकाद्य समये ख्याता तृतीयाऽक्षया।
सावित्री सधवात्मिका शिवशिवायात्रा च संपाल्यते
सूर्याशौर्यभयं निरस्य नितरां मज्जन्ति ते पर्वसु॥
(22)
कालेऽस्मिन् स्वदते प्रपानकमहो स्वादिष्ठतक्रादकं
शैत्याम्भःकदलीसुखण्डसहितं लोकस्य तृप्तिप्रदम्।
तस्मात्तद् ददते जनाः पथचरे-भ्यो धर्मकामा मुदा
नोचेद् धर्मबलं क्षितौ न हि भवेत् सर्वे न वै स्वर्थिनः॥
(23)
आम्रं तालफलं सुपक्वपनसं रम्भाफलं कर्कटी
दुर्लभ्यं लिचु नारिकेलसुजलं दिव्येक्षुपाकादिकम्।
तक्रं शैत्यजलं दधीक्षुसुरसः किं वामृतं शान्तिदं
लोकाः प्रीततया पिबन्ति नितरां गृह्णन्ति भोक्तुं सदा॥
(24)
दध्यन्नं जलपूरितं सलवणं पालाण्डुखण्डैर्युतं
लेम्बुस्वादसमन्वितं रुचिकरं स्वल्पाम्लसंमिश्रितम्।
स्नानं कूपजलेन हैमसलिलं छायां वटस्य द्रुमाद्
भुक्त्वा ग्राम्यजना वसन्ति ससुखं ते स्वास्थ्यवन्तः सदा॥
(25)
सन्ध्या प्रीतिविवर्द्धिनी रविमणेः सिन्दूरविन्दूपमान्
नानायानजनाः पथां बहुलतां कुर्वन्ति संदृश्यते।
छात्राः कन्दुकयष्टिखेलनिरता धावन्ति गावो गृहं
प्रत्यायान्ति खगाः स्वकीय वसतिं रावन्ति वै जम्बुकाः॥
(26)
सर्वेषां च वपुः कृशढ्यसिचयैः संशोभतेऽस्मिन् क्षणे
छात्रा मुक्तकलेवराः सुशिथिलं गृह्णन्ति चार्द्धोरुकम्।
वृद्धाश्चैककृशांशुकेन पिहिता मार्गे व्रजन्त्यत्वरं
घर्माक्ता रमणी विकुण्ठितमना नो याति पाकालयम्॥
(27)
रात्रिर्वायुविनोदिनी यदि भवेच्छान्तिस्तदा जायते
सा चेद्वायुवियुक्तिका क्षणमपि स्वात्मा वियुक्तायते।
दुर्वारा मशका विदंशनकृते प्रायान्ति तस्मात् कुतः
प्राणा यान्ति सहायको न हि तदा सर्वे यतः पीडिताः॥
(28)
तापात्क्षीर्णमना विलासरहितात् निद्राप्रिया चञ्चला
रोषात्सा किमु कस्य नेत्रयुगलं नायाति रात्रौ चिरम्।
यावन्नर्द्धनिशं क्षितौ विहरते नो वाति वायुर्मृदु
स्तावत् कोमलकामिनीं गुणवतीं धर्त्तुं नो कोपि क्षमः
(29)
विद्युद्वायुबलाद् विमुह्यति कदा क्षुब्धापि तापात् पुनः
शीतस्पर्शवशाद् विमुग्धहृदया नेत्रेऽखिले नृत्यति।
गाढालिङ्गनचुम्बनादिफलतः प्रातर्न वा ज्ञायते
धन्या सा हितसाधनी रसवती तस्या विना धिग् जगत॥
(30)
वित्ताढ्या मृदुशीततापखचितं यन्त्रं गृहाभ्यन्तरे
केचित् शीतलवायुदायकमहो गृह्णन्ति यन्त्रं भयात।
विद्युन्मारुतदं नियोज्य सदने केचिल्लभन्ते सुखं
कः पत्रव्यजनेन कष्टसमयं दूरीकरोति क्षणम्॥
(31)
विद्युच्छक्तिसहायिका दिननिशं नोचेन्महासङ्कटं
देशक्लेशविनाशने न निपुणा सर्वत्र सा क्षीणभा।
तच्छिन्नापि पुनः पुन र्जनमनो दुःखायते सर्वदा
ग्रीष्माहो नितरां व्यथा जनयति त्रायस्व नारायण॥

*इति पं. श्रीव्रजकिशोरत्रिपाठि-विरचिते
ऋतुकाव्ये ग्रीष्मखण्डं संपूर्णम्*

# किमु धुनोषि निजं हृदयं कवे!!

-डॉ. अरविन्दःतिवारी

मधुमयं निगदन् वचनं द्ररुतं
विशसि चेतसि सम्प्रति हे सखे।
तदनु मे प्रसमीक्ष्य गुणावलीं
किमु धुनोषि निजं हृदयं कवे!1

गृहमुपेत्य खचुम्बि मनोहरं
सकलसौख्यभरं प्रविलोकयन्।
नहि रसं पिबसीव सुधामयं
किमु धुनोषि निजं हृदयं कवे!2

मम सुतं विभवं प्रियमानतं
भवनभाग्यमिमं त्ववलोक्य हे।
सुवदनं हसतीव न ते सुखं
किमु धुनोषि निजं हृदयं कवे!!3

रतिसमामवलोक्य मनोरमां
कनकभूषणभूषितविग्रहाम्।
कमलिनीकुलजां मम भामिनीं
किमु धुनोषि निजं हृदयं कवे!!4

नवमये मम वाहनमद्भुतं
व्यथयतीव सखे तव मानसम्।
कलियुगे नृमनः कलुषायितं
किमु धुनोषि निजं हृदयं कवे!!5

# भारतमाता ब्रूते महाकाव्ये राष्ट्रियभावना

**-विष्णु दत्त तिवारी**
**(शोधच्छात्रः)**
**राष्ट्रिय–संस्कृत–संस्थानम्**
**नव–देहली**
**सम्पर्कसूत्रम्– 9720953440**
(tiwarivishnudatt1@gmail.com)

कविः मानवजीवनस्य सुखैः दुःखैः सह तादाम्यसम्बन्धं स्थापित्वा मानवजीवनस्य हृदयस्पर्शीपक्षान् प्रभावपूर्णभाषायाम् अभिव्यक्तं करोति। काव्येन जनहृदयः स्पन्दितः भवति, अन्तर्मनस्य मूकवेदना स्व पूर्णं प्रभावशालिः च अभिव्यंजनां प्राप्नोति। भारतीयसंस्कृतेः जनजागरणस्य च अग्रदूताः संस्कृत– काव्याः तात्कालिकजीवनस्य अन्तरालं परीक्ष्य तस्य वास्तविकं वर्णनं प्रस्तौति।

साहित्यस्य विविधाविधासु महाकाव्यं सर्वाधिकं महत्त्वपूर्णकाव्यरूपमस्ति। महाकाव्यः जीवनस्य सर्वाङ्गस्वरूपं प्रतिबिम्बितकरणस्य एतादृषम् उत्कृष्ट–प्रबन्धोस्ति यस्यां कश्चित् देशस्य राष्ट्रियभावना सुरक्षिता भवति। महाकाव्यस्य अध्ययनेन अनुमीयते यत् आचार्य दीक्षितवर्यः महान् राष्ट्रवादी भारतीयसभ्यता–संस्कृतिप्रेमी चास्ति। करुणावान् मानवः समष्टिरूपेण समाजे वर्धमानदुःखदैन्यान्यायान्याचारान् दूरीकर्तुं सर्वथा प्रयतते। परं तत्रासौ सुलभसाधनानि एवं प्रयुङ्क्ते। तत्र उपदेशकः स्वोपदशैः, शिक्षकः स्वशिक्षया, लेखकः स्वलेखनेन, कविः स्वकवितया, विधायकः स्वविधेयकैः, शासकः स्वशासनेन प्रशासकः स्वप्रशासनेन चापकर्तुं प्रयतन्ते। क्रमेस्मिन् कविरपि यथासामर्थ्यं प्रयत्नं कुरुते।

एकविंशति शताब्द्यां डॉ. हरिनारायणदीक्षितप्रणीतं सहृदयहृदयग्राही राष्ट्रवादोपेतं **'भारतमाता ब्रूते'** इति महाकाव्यं संस्कृतजगत्यस्मिन् देदीप्यमानं भारतीयान् नितरामुपदिषति राश्ट्रकल्याणाय चाभिप्रेरयति। इदं महाकाव्यं सकलभारतीयजनमानसमभिरञ्जयन् कर्तव्यविमुखजनान् कर्तव्ययाभिमुखीकरोति, असंस्कृत– जनाँश्च संस्कृतं कर्तुं नूनमेव उपदिशति। कविः विष्णुमाध्यमेन कथयति यत् सज्जनाः स्व जन्मभूमिं जननीं च सर्वदा आद्रियन्ते सुखितां च कुर्वते।

**स्वां जन्मभूमिं जननीं च सज्जनाः।**
**सदाद्रियन्ते सुखितां च कुर्वते ।।**

**(भारतमाता ब्रूते 11/38)**

राष्ट्रियभावनायाः वर्णनं कुर्वन् कविः कथयति यत् भारतीया संस्कृतिः राष्ट्रियभावनया आप्लावितास्ति। भारते '**अतिथि देवो भव**' एतादृशी भावनास्ति कविरपि कथयति यत् भारतदेशे अतिथि–सत्कारस्य सुदीर्घा परम्परास्ति, अतिथीनां भोजनं समयेन भवेत् ।

**अतिथिसपर्या समये**
**भारतदेशे मतास्त्यपरिहार्या।।**

**(भारतमाता ब्रूते 16/25)**

स्वार्थस्य भावनां भर्त्सनां कुर्वन् कविना राष्ट्रियभावनायाः विचारस्य प्रशंसामकरोत्। कविः कथयति यत् स्वार्थः अवश्यमेव जनस्य सन्मतिं हन्ति अत एव परोपकारस्य भावनायाः वृद्धिः भवेदेव जनेषु।

**स्वार्थः कलौ हन्ति जनस्य सन्मतिम्।**

**(भारतमाता ब्रूते 22/43)**

द्वाविंशतिसर्गस्य महाकाव्येष्वस्मिन् प्रथमसर्गे भारतमातुः वन्दनां कुर्वन् कथयति यत् जन्मभूमिरपि जननीव वन्दनीयः सज्जनाः कथयन्ति, अत एव अहं भारतभूमेः वन्दना करोमि । भारतभूमेः प्रषंसां तु देवाः अपि मुक्तकण्ठेन गायन्ति। देवत्व समाप्तेरन्तरं अत्रैव जन्मग्रहितुमिच्छन्ति देवाः।

**देवाः गायन्ति गीतानि**
**प्रशस्तौ भारतावनेः।**
**तत्र प्रादुर्बुभूशन्ति**
**देवत्वे क्षीणतां गते।।** **(भारतमाता ब्रूते 1/54)**

विश्वस्य सर्वे देशाः भारतजीवनदर्शनस्य, संस्कृतेः धर्मस्य च भूरि–भूरि प्रषंसा कुर्वन्ति। भारतदेशे आतिथ्यं सत्यमस्तेष्यं शौचमिन्द्रियनिग्रहः, त्यागः, दया अहिंसेत्यादि मूल्यानां पाठाः पाठ्यन्ते। कविः स्व दिश्टेः प्रषंसां कुर्वन् कथयति यत् अहमपि भाग्यशाली अस्मि, यत् मम जन्मभूमिः भारतभूमिः अस्ति।

**ईदृशी भारतीभूमिः**
**विद्यते मम जन्मभूः।**
**नूनं मे सञ्चितं किञ्चित्**
**पुण्यकार्यं कलोन्मुखम्।।**
**(भारतमाता ब्रूते 1/59)**

**उपसंहारः–**

अन्ते वक्तुमिच्छामि यत् सम्पूर्ण–संस्कृत–साहित्यं राष्ट्रियभावनया आप्लावितः अस्ति। वसुधैव कुटुम्बकमिति भावनया कविः समाजे व्याप्तव्याथां कथां वर्णनं कृत्वा जनानां कश्टेन स्वयमेव व्यथितमनुभवति । सम्पूर्णराष्ट्रं कष्टरहितं भवेदिति ईष्वरेण प्रार्थनां कृत्वा कविः स्पृटयति यत् ग्रन्थोष्यं राष्ट्रियभावनायाः विकासस्य संदेशं ददाति।

# अयि भव्यभारतदर्शनलुब्धमानस!

**डॉ० निरञ्जनमिश्रः**
**श्री भगवानदास–आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्**

भवतां चेतसि भारतीयामरगाथा सर्वदा जीवितेव तिष्ठतीत्यत्र नास्ति काचिच्छंका। परन्तु वर्तमानकालिकनीतिनटी यथा स्वार्थवशान्नृत्यति तत्परिणामवशात् सा निसर्गसुन्दरा संस्कृति क्वचित् जवनिकाच्छन्नेवाभाति। तदर्थमस्माकमेव दायित्वं प्रबलमिति मत्वाऽस्माभिरेव यतनीयम्। कश्चित् किमपि करोति न वेति चिन्तापहाय निजेप्सितार्थसिद्धये बद्धपरिकरा भवामश्चेन्नूनमेव कालान्तराले स्यात् समुचितपरिणामावाप्तिः। अन्यस्कन्धे भारनिक्षेपणेन स्वकार्यसिद्धिचिन्तनं न रोचते मतिमताम्। स्वकार्यं साधयेत् धीमानिति वचनमङ्गीकृत्य निजलक्ष्यनियोजितनेत्रैर्भाव्यमस्माभिरेव।

बलानां चेतसि निजसंस्कृतेः रमणीयचित्रनिदर्शनमावश्यकमिदानीम्। तदनुकूलवातावरणनिर्माणाय किं करणीयमिति चिन्तने नियोजने चापि सन्नद्धैर्भाव्यम्। अन्यः कश्चिन्नैवायास्यति तदर्थमिति निश्चित्य। कार्यस्य वैशिष्ट्यमालोक्यान्येऽपि सहचराः स्वयमेव भवन्तीतीदानीमपि दष्टक्पथमायाति। संस्कृतभाषाया माधुर्यं सौकर्यं च स्वयमेवाकर्षति जनान्। विविधविधभौतिकभोगसंवलितेऽपि समाजे, वैज्ञानिकवातावरणाच्छन्नेऽपि गगने संस्कृतपदमेव कमपि सिद्धान्तं प्रमाणयतीदानीमपि। वैज्ञानिका अपि स्वमतपोषणाय संस्कृतपदमेवोद्धरन्ति। एतेन सूच्यते यल्लोकचेतसि संस्कृतम्प्रति या निष्ठा पूर्वमासीत्सेदानीमपि वर्तते। परन्तु कालस्य चाकचिक्यवशात् दिग्भ्रमितास्सन्तो जना नवपथगामिनो वर्तन्ते। सामान्यजनोचितभाषया निजसंस्कृतेः स्थापनाय यतन्तो धुरन्धरा स्वकार्यमावहन्त्यधुनापीति प्रमोदस्यावसरो वर्तते। वयं सर्वे तत्सहयोगिनो भवामो वा स्वस्वधिया तदनुकूलकार्यमाचरामश्चेद्वरम्। परदोषोद्घाटनविज्ञापनमपहाय स्ववैशिष्ट्यविज्ञापनमावश्यकम्। परन्तु विज्ञापनस्य पद्धतिस्समयानुकूला भवेत्। समयानकूलतैव कमपि प्रवाहं प्रवाहयति। प्राचीनपद्धतेरालोक एव नवीमार्गान्वेषणमावश्यकम्। अस्यामेव सरणौ सामान्यभाज़या लोकमनोरञ्जिका पत्रिका कश्चिदन्यतमो विकल्पो वर्तते। समयानुकूलविषयमादाय संस्कृतेरनुकूलविवेचनोपस्थापनेन जनानां चित्तमाह्लादयितुं शक्नुमः इत्यपि कश्चित्पक्षो वर्तते। तदर्थमस्माभिनूर्ननमेव यतनीयमिति शम्।

# प्रयागः

प्रयागे तीर्थराजे सङ्गमे विहरति मनो नित्यम् ।
तटे गंगाजले यमुनाजले रमयति मनो नित्यम्।।1

प्रकृष्टो यत्र सञ्जातो मखो ब्रह्मा समायातः।
प्रयागस्तीर्थराजाख्यो मनस्सुखयत्यहो नित्यम्।।2

त्रिवेण्यामागतैर्भक्तै- सततमवगाहनं क्रियते ।
प्रयागे माघमासे मज्जनं मदयति मनो नित्यम्।।3

लभन्ते दर्शनं भक्ताः तटे हनुमन्महाबाहोः।
अधोबन्धस्य पूर्णः परिसरो विलसति मनोनित्यम्।।4

वटद्रोर्दर्शनं लब्ध्वा मनसि सञ्जायते पुण्यम् ।
इहैवाराधनमवगाहनं शमयति मनो नित्यम्।।5।

यदा कुम्भोत्सवः आयाति द्वादशवार्षिके जाते।
दिवारात्रं प्रयागे मेलनं विहरति मनो नित्यम्।।6।

समस्ताः साधवः देवाः रमन्ते मासपर्यन्तम्।
स्वयञ्चागत्य 'रसराजो' जले रसयति मनो नित्यम्।।7।

**-डॉ.राजेन्द्र त्रिपाठी 'रसराज'**
अध्यक्ष- संस्कृत विभाग
इलाहाबाद डिग्री कॉलेज
इलाहाबाद वि, .वि.,प्रयागराज

# ॥ श्रीरामस्मृतिनवमी ॥

**-श्रीसुरेन्द्रमोहनमिश्रः,कुरुक्षेत्रम् ,**

1
श्रीरामो रममाणानाम्
अध्वा धाम विरम्यताम्।
कोटिकल्पतरुस्तारो,
रामो ब्रह्म रमे मुहुः !!
2
श्रीरामे जानकीरामे , जीवनेऽवध्यवासिनाम्।*
नित्यानां भुवि भूतानां ,
भुक्तिर्मुक्तिमतां मह्!!
3
रामेत्यक्षरतद्द्वन्द्व-,
मद्वन्द्वाद्वैतमूर्जितम्।
महोत्कटपरापुण्यं ,
स्मृतीद्धं वेङ्कटं तु नः!!
4
रामे मे महसां नाथे ,
मयि रामे महोमये।
सीताम्बा वह्निप्रणता ,
विश्वात्मा महिता मही !!
5
श्रीराम ! हे राम ! कृपाकटाक्षं ,
धेह्यम्बिकेवाऽऽत्मनि मे विशैषम्।
यावत्स्फुरत्यन्तरुमामहेश-
रामोऽहमस्मीत्यथ निर्विशेषम् !!
6
तव तत्त्वं न तद्वेद्मि,
न वेद्मीति महान्मदः।
मुमोदास्मिन् महाघोरे ,
हंहो चित्तस्य चित्रता !!
7
तच्चित्तं भूतगगनं,
सृष्ट्वा सृष्ट्वा ह भुञ्जति।
श्रीराम राममुदितं,
जाग्रदादि भवे भवे !!
8
तच्चैति चित्तं पुनरेति वासनां,
दिव्यां हि निर्वासनवासितां क्वचित्।
राम ! स्वलीलाद्वयमेसि निर्भरं,
स्वात्मप्रदीप्तौ चितिशेषशेषणे !!
9
विश्राम्यंश्चिन्महाव्योम्नि !
राम ! लोकं त्रयीमयम्।
मायाहव्यमयं यज्ञं,
पाहि त्रैलोक्यसङ्गहात् !!
10
प्राणानन्दं प्रियात्मानं,
स्मरतो दक्षिणं द्विजम्।
चेतस्स्फूर्त्तिरियं राम्या
स्वात्मरामस्य कौरवे ॥

# प्रो.सी.उपेन्द्ररावमाध्यमेन विदेशेषु भारतीय-प्राच्यविद्याविषयेषु व्याख्यानं सम्पन्नम्

नवदेहली। जवाहरलालनेहरू विश्वविद्यालयस्य प्रो. सी.उपेन्द्ररावः विदेशुषु भारतीय प्राच्य विद्या आधारित विभिन्न विषयेषु विभिन्न वैदेशिकी विश्वविद्यालये व्याख्यानं दत्तवान।

रीगा स्थित लातविद्या विश्वविद्यालय एवं लातवियायाः सांसद डॉ. रोमुआलदसः विशेष



रूपेण प्रो. सी. उपेन्द्ररावः स्व वैदेशिकी यात्रायाः अन्तर्गत भारतीय प्राच्यविद्यायाः प्रमुख विषयेषु महत्वपूर्ण व्याख्यानं दत्तवान्। प्रमुख विषयेषु वेदान्त परिचयः (द्वैत, अद्वैत एवं विशष्टिद्वैतस्य सन्दर्भे) बौद्धदर्शन, सांख्यदर्शनस्य परिचयः, कालीदास एवं तस्य काव्य सौन्दर्य, संस्कृत काव्येषु अलंकाराणां प्रयोग एवं भारतीय संस्कृति अवगमने पालि साहित्यस्य भूमिका आदि विषयः आसीत्।

उल्लेखनीयोऽस्ति प्रो. सी. उपेन्द्ररावः जवाहरलालनेहरू विद्यालयस्य संस्कृत एवं प्राच्यविद्या संस्थाने संस्कृत एवं पालि भाषायाः वरिष्ठ आचार्योऽस्ति। प्रो. रावः कम्बोडिवा इत्यस्य नामपेन्ह स्थित बौद्ध विश्वविद्यालये आई.सी.सी.आर इत्यस्य अध्यक्ष पदेऽपि कुशलतापूर्वक कार्य कृतवान। प्रो. रावः इदानीं पर्यन्तं विंशति पुस्तकानां लेखनं एवं सम्पादन कार्य कृतवान। वर्तमाने ते भारतीय प्राच्य विद्यायाः विषये कार्य करोति। इदानींतन समये ते वियतनामे कम्बोडियायाः संस्कृत अभिलेखेषु भारतीय संस्कृति इत्यस्योपरि शोध पंत्र प्रस्तौतम्।

प्रो. राव माध्यमेन 2018 तमे वर्षे अगस्तमासे संयुक्त राज्य अमेरिकायाः डलासे आयोजित बेव संगोष्ठ्यां ''अक्षर पुरूषोत्तम दर्शन'' इत्यस्योपरि शोध पत्रं प्रस्तुतवान यं अन्ये विद्वान्सः प्रसंसा कृतवान। अप्रैल मासे ते लिथवानियायाः द्वे विश्वविद्यालयेषु स्व वक्तव्यं दत्तवान एवं तेन सह ''विश्वशांति'' विषये स्व वक्तव्यं लिथवानियायाः संसदीय एनेक्सी इत्यत्रापि। प्रो. राव युक्रेनस्य राष्ट्रिय विश्वविद्यालय कीव मोहिलायां एवं कजाकिस्तानस्य एल.एन.जूनमासस्य 2018 तमे वर्षे ते हवें क्वांग मोनेस्ट्र, होथीमिन्हे, वियतनामेऽपि संस्कृतस्य अध्यापन कार्य सम्पादितवान।

# राममन्दिरनिर्माणाय सर्वकारः अध्यादेशम् आनयतु-श्रीश्रीरविशंकर

नवदेहली। आर्ट ऑफ लिविंग इत्यस्य संस्थापक एवं आध्यात्म गुरू श्री श्री रविशंकरस्य कथनमस्ति यत् अयोध्यायां श्री रामस्य भव्य मन्दिर सर्वेषां सहयोगेन भवितव्यम्। यदि उच्चतम



न्यायालय न दास्यति तर्हि सर्वकारः मन्दिर निर्याणाय अध्यादेशः आनयन्तु। एकः सामाचारपत्रस्य संवादतया वार्ता समये श्री श्री रविशंकरः उक्तवान यत् वयं इदानीमपि प्रयत्नशीलोऽस्मः यत् उभय पक्षः आम सहयति मन्दिर निर्माणस्य मार्गः प्रस्तत कुरू। ते उक्तवन्तः यत् गत वर्षत ते 500 तः अधिक इमाम व मौलवी इत्यदेन सह वार्तालापः कृतवान यो राममन्दिरस्य पक्षे सन्ति। तस्य माध्यमेन मध्यस्थताया प्रश्ने ते उक्तवन्तः यत् इतः पूर्वं निर्मोही अखाड़ा इत्यस्य महंत रामचन्द्रदास समेत उभय पक्षस्य जनाः तं उक्तवान यत् ते मन्दिर निर्माणास्य मध्यस्थता कृत्वा विवादस्य निराकरणं कुर्वन्तु। ते उक्तवन्तः यत् तेषां मध्यस्थतायाः प्रयास विफलः नाभवत्। वयं प्रयासः कुर्मः। मन्दिर निर्माणस्य पथ शीघ्रेव प्रसस्तः भविष्यति। उच्चत्तमन्यायालय माध्यमेन शीघ्र निर्णय न प्रदानस्य दूर्भाग्यपूर्ण उक्त्वा श्री श्री उक्तवान यत् मन्दिर निर्माण एवं सबरीमाला मन्दिर प्रवेशः आस्थायाः विषयोऽस्ति अस्य निर्णयः धार्मिक मान्यतायाः अनुसारेण भवितव्यम्।

# महर्षिदयानन्देन संसाराय प्रदता नूतनदिशा

नवदेहली। षोड्स (16) बारं विषपानान्तरमपि महर्षि दयानन्दसरस्वती मानवतायाः कार्ये संलग्नः आसीत्। स्व जीवनेन् ते विश्वं नूतन दिशा प्रदत्तवानः। एते सर्वे 135 महर्षि दयानन्द निर्माणोत्सवे रामलीला क्षेत्रे आयोजित अन्ताराष्ट्रिय आर्य महासम्मेलन दिल्ली आर्य प्रतिनिधि सभा प्रधान महाशय धर्मपाल आर्यः उक्तवान। अस्मिन्नवसरे धर्मपालः आह्वाहनं कृतवान यत् महर्षि दयानन्दसरस्वती महोदयस्य कार्यान् पूर्ण करणाय तं विश्वे प्रसारित करणाय कर्मठ अग्रे




आगमिष्यन्तु।

आचार्यो विदूषी आयुषी आर्य उक्तवती यत् महिला व पुरूष सर्वे वेदाध्ययनस्य अधिकारोऽस्ति। समाजसुधारक महर्षि बहु परिश्रेपण समाजे समरसता आनीतवान। ते उक्तवन्तः यत् विकासाय सर्वेषां सहयोगः अपेक्षितोऽस्ति। आर्यकेन्द्रिय सभा माध्यमेनायोजित उड़ीसातः समागत आर्य संन्याषी स्वामी सुधानन्द सरस्वती वैदिक संस्कृतिं अग्रेसारणाय संकल्पः दत्तवान।

अस्मिन्नवसरे इंद्र विसन (सुरीनाम) स्वामीकमलानन्द (येकोस्लोवाकिया) पं. चिंतामणि (मारीशस) दीपादास (बर्मा) समेत अन्य देशतः समागत् प्रतिनिधीन् सम्मानितवान।

सम्मेलने समाजसेवी योगेशमुंजाल, सुरेन्द्रकुमाररैली, राजेन्द्रदुर्गा, कीर्तिशर्मा, सीतशचड्ढा,उषाकिरण आर्या व अरूणप्रकाशवर्मा अपि महर्षि दयानन्दस्य कर्मयोगी जीवने प्रकासं दत्तवान। अन्ते महासम्मेलनस्य सफलायोजनाय महाशय धर्मपालआर्य व महामंत्री विनयआर्य आर्यरत्नेन सम्मानितवान्। इतः पूर्वं आचार्य कल्पनायाः सानिध्ये सर्वहितकारी शुद्ध यज्ञेन सम्मेलनस्य शुभारंभो जातः। एवं सांस्कृतिक कार्यक्रम अपि अभवत्।

# राष्ट्रभक्तिरसाश्रितसंस्कृतमहाकाव्येषु 'श्रीनरेन्द्रविजयकाव्यम्' राष्ट्रियपरिसंवादः'

राष्ट्रभक्तिरसाश्रितसंस्कृतमहाकाव्येषु 'श्रीनरेन्द्रविजयकाव्यम्'

भारतीयशिक्षणमण्डल-गांधीनगरम् एवं गुजरातसाहित्यः अकादमी गांधीनगर इत्यनयोः संयुक्तोपक्रमे उपर्युक्त विषये समायोजिते राष्ट्रियपरिसंवादे समुपस्थितानां सवेषां महानुभावानां छात्राणां नगरजनाना च कार्यकलापन वृत्तम् संक्षेपेण निम्नानुसारं समुपलभ्यते।

परिसंवादस्य प्रारम्भे मञ्चस्थाः महानुभावाः सरस्वतीवन्दनापूर्वक दीपप्रागट्यमकुर्वन्। संयोजक प्रो. डॉ. अम्बालालः प्रजापति महोदयाः (महाकाव्यस्य प्रणेता) महाकाव्यत्य परिचयात्मक प्रस्ताविक विहितवन्त, महानुभावानां महाकाव्येन पुष्पगुच्छेन च स्वागतं कृतवन्त। उद्घाटकरूपेण निमन्त्रिताः गुजरातराज्य साहित्य अकादमी-संस्थायाः अध्यक्षाः पद्मश्री विष्णुभाई पूण्ड्या महोदयाः महाकाव्यस्य 'विकासवर्णनं नाम अष्टमसर्गस्य श्रेष्ठता संयोषयन्त महाकाव्यस्य अतोऽपि अधिकविस्ताराय कवयः प्रद्योदितवन्तः।

परिसंवादस्य सारस्वतविशेषरुपेणोपस्थितैः दिल्लीस्थैः पद्मश्री डॉ रमाकान्तशुक्लमहोदयैः स्यप्रवचने महाकाव्यस्यामूलचूलं चर्चा विहिता। अतः परं तत्रभवन्तः राजकविराष्ट्रकविभेदं विशदिकृत्य काव्यप्रणेतारं राष्ट्रकविरुपेण स्थापितवन्तः। राष्ट्रवैभववर्णनमेव राष्ट्रधर्मः। कविः सर्वभावेन राष्ट्रधर्म निर्वाह्य राष्ट्रनायक स्वशल्या देवभाषाया निबध्य तस्यैषा तत्त्वं प्रदतवन्तः।

परिसंवादस्य प्रमुखरुपेण प्राप्ताः माननीयः डॉ. गौतमभाई पटेलमहोदयाः पूर्वसूरिभिः कृतानि महाकाव्यलक्षणानि स्मृत्वा 'श्री नरेन्द्रविजयमहाकाव्यस्य चर्चा विहितवन्तः। महाकाव्यक्षेत्रे महाकाव्यमिदं समुचित स्थानं यास्यत् निश्चितं कवेः गौरवं वर्धिष्यन्ति

अतिथिविशेषरूपेण समागताः (मध्यदेश) सागरविश्वविद्यालयस्य कुलाधिपति डॉ. बलवन्त जानी महोदयाः महाकाव्यस्य प्रणेतारं नायकं चाधिकृत्य स्वविचारान् प्रगटीकृतवन्तः।

परिसंवादे वक्तारूपेण चोपस्थितैः डॉ. हर्षदेवमाधव प्रमुखैः अन्यैः वक्तृभिरपि विषयमधिकृत्य स्वमतस्थापनपूर्वक परिसंवादमलंचक्रे। पर्यन्ते काव्यगोष्ठिश्च सञ्जाता तत्र डॉ. रमाकान्त शुक्ल, डो. हर्षदेवमाधव, डॉ. अम्बालाल प्रजापति, डॉ, योगिनी भगिनी आदिभिः स्वरचितानि काव्यानि पठित्वा परिसरं काव्यरसेन परिप्लावितम् डॉ. मनुभाई प्रजापतिः कार्यक्रमस्य सफलं सञ्चालनं कृतवान् । आभारविधिः डॉ. विष्णु पुरोहितेन समुचित

डॉ. अम्बालाल प्रजापतिः

अस्माकं प्रेरणास्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।